संस्कृतिः

संस्कृतसङ्घस्य वार्षिकी पत्रिका



सर्वजिन्नाम संवत्सरः

२००७

संस्कृतभाषायां प्रथमा सञ्चिका - २००७
पूर्वसञ्चिकाः - १९७८, १९८५, १९९४, १९९५

मार्च् २००७ मासस्य २५ तमे दिनाङ्के लोकार्पिता

द्वितीयमुद्रणम् - जुलै २००७ मासः

संस्कृतसङ्घस्य कार्यनिर्वाहकवर्गः

अध्यक्षः — प्राचार्यः वी. वी.एस्. शर्मा (गणनविज्ञानविभागः)

कार्यदर्शिनौ — एच्. एल्. प्रसादः (विद्युद्विभागः)
कार्तिकरामन् (क्षिप्रतमगणकयन्त्रसंशोधनविभागः)

कोशाधिकारी — वै. कालिदासः (क्षिप्रतमगणकयन्त्रसंशोधनविभागः)

सम्पादकवर्गः

एच्. एल्. प्रसादः (विद्युद्विभागः)

हरिपवनकुमारः (विद्युद्विभागः)

भै. विजयादित्यः (विद्युत्सम्पर्कविभागः)

आर्. एस्. उमेशः (विद्युद्विभागः)

शिवरामकृष्णः (विद्युत्सम्पर्कविभागः)

आमुखम्

भारतीयविज्ञानसंस्थायां स्थितोऽयं "संस्कृतसङ्घः" सर्वविज्ञानस्य मूलभूतायाः संस्कृतभाषायाः, भारतीयसंस्कृतेः, भारतीयविज्ञानस्य च प्रसाराय कृतलक्ष्यः वर्षे वर्षे, दिने दिने वृद्धिमधिगच्छन्नस्ति। सङ्घेनानेन तत्कृते चाल्यमाना वार्षिकी पत्रिकेयं "संस्कृतिः" बहोः कालात् प्रभृति बहूनां विदुषां, कवीनां लेखनीभ्यः निस्सृतानां विचारामृतधाराणां सारशेवधिर्भूत्वा संस्कृतभाषायाः तथा भारतीयसंस्कृतेः, भारतीयविज्ञानस्य च दर्शनं कारयति। वेदवेदान्तेतिहासशास्त्र-पुराणेषु, विविधकाव्येषु च निबिडीकृतान् विषयान् क्रोडीकृत्य अनेके ज्ञानिनः, पण्डिताः, रचयितारश्च अस्मिन् प्रसारे भागं गृह्णन्ति। अनेन च सङ्घेन १९७८, १९८५, १९९४, १९९५ वत्सरेषु समाजोपयोगिभिः, भारतीयसंस्कृतिसंबद्धैः विविधैः विषयैरुपबृंहिताः पत्रिकाः कल्पिताः।

भारतीयसंस्कृतेः महत्त्वं, विश्वजनीनभावनायुक्तत्वं, विशालभावनात्मकत्वं, सर्वदा अविस्मरणीयत्वं च बोधयितुं, ज्ञापयितुं, भविष्यत्सन्ततिं प्रति तत्सङ्क्रामयितुं च एताः पत्रिकाः बहूपकुर्वन्तीति निर्विवादोऽयमंशः। तदिमं कार्यक्रमं अनुस्यूततया विधातुं अस्मिन् २००७ वत्सरेऽपि अस्याः पत्रिकायाः सम्पादनं सङ्घेनानेन आरब्धम्। इतः पूर्वं संस्कृताङ्ग्लभाषयोः मिश्रणेन प्रचुरितैषा पत्रिका

अस्मिन् सञ्चिकायां केवलगैर्वाण्यामेव साक्षाद्भवतीति विशेषोऽयमंशः। अस्यां पत्रिकायां गैर्वाणीप्राशस्त्यप्रबोधकाः, भक्तिवर्धकाः स्तोत्ररूपाः, विविधकवीनां कवितामृतरूपाः, वेदान्तप्रबोधकाः, नीतिदायकाः, गद्यपद्यात्मकाः अंशाः बहवः निबद्धाः। तेषां विषयाणां अत्र प्रकटनाय कृतानुमतीनां सर्वेषामपि महतां, विदुषां, कवीनां अयम् सङ्घः पुनः पुनः कार्तज्ञ्यं व्याहरति।

अस्याः पत्रिकायाः अवलोकनेन संस्कृतभाषाभिमानिनः सर्वे जनाः उत्फुल्लहृदम्बुजाः भवेयुरिति विश्वसिमः।

——x——

कृतज्ञता

संस्कृतसम्भाषणशिबिरसमायोजनाय कक्ष्याप्रदानं कृतवते विमानोपग्रहविभाग-प्राचार्याय श्री बी. रघुनन्दनमहोदयाय, कार्यक्रमचित्रीकरणाय चलच्चित्रसङ्ग्राहक-यन्त्रं अनुगृहीतवते विद्युद्विभागप्राचार्याय श्री के. आर्. रामकृष्णन् महोदयाय, सम्भाषण-व्याकरणशिबिरसञ्चालनसूत्रधारिण्यै 'संस्कृतभारती' संस्थायै, अन्तर्जालस्थाननिर्माणाय कृतसाहाय्याय प्रणयनविद्याविभागप्राचार्याय श्री श्रीनिवासराघवन् महोदयाय, वाग्गेयकाराराधनमहोत्सवसंविधायै कृतो-पकारायै डा. शारदामहोदयायै, निजवाङ्माधुरीविजितजनावलिमनोभ्यां सर्वकाल-सर्वावस्थासु वात्सल्यपूरितहृदा कृतमार्गनिर्देशकाभ्यां अवधानिभ्यां गणेश-शङ्कराभ्यां, अनवरतमस्माकं योगक्षेमविचारणपराय विद्युद्विभागप्राचार्याय श्री जी. नारायणन् महोदयाय, सभाकार्यनिर्वहणाय वेदिकां प्रदत्तवद्भ्यः चोक्सिसभाङ्गण–सतीशधावनसभाङ्गाण–राजारामण्णसभाङ्गणसञ्चालकेभ्यः, सर्वान् कार्यक्रमान् सम्यक् सम्पादयितुं प्रत्यक्षे वा परोक्षे वा साहाय्यं कृतवद्भ्यः नैकेभ्यः कार्यकर्तृभ्यः, विद्वद्भ्यः, गुरुभ्यः संस्कृतसङ्घः हृदयपूर्वकं कृतज्ञताभिवन्दनानि समर्पयति।

——x——

सम्पादकीयम्

युगमेनं वयं 'संव्यवहारशील'युगं इति कथयन्तः स्मः। परन्तु एतद्युगं बहोः कालात् पूर्वं एव आरब्धम्। भावव्यक्तीकरणार्थं मानुषः यदा भाषां अजानात् तदैव प्रवर्तितं एतत् 'संव्यवहारशील'युगम्। व्यवहारे विद्यमानासु भाषासु गैर्वाणी एव सर्वोत्कृष्टा भाषा इति बहवो विदुः। संस्कृतभाषायां स्थिता पदसंपत्तिः अन्यायां कस्यामपि भाषायां न दृश्यते। विश्वस्य प्राचीनतमासु भाषासु संस्कृतभाषा विशिष्टा। परन्तु तादृशी प्राक्तना भाषाऽऽपि आधुनिकभावपरिस्फुटसंश्लिष्टा भवतीति निर्विवादोंऽशः। अपि च समुन्नतभावप्रकाशनार्थं गैर्वाणी साहाय्यकरी, मार्गदर्शिनी च चकास्ति। भाषा न केवलं भावान् प्रकटयति, भावान् प्रेरयति पोषयत्यपि। एतदेव साहित्यस्य गम्यस्थानं वर्तते तथा च सामाजिकमानसिक-आध्यात्मिकविकासाय अत्यावश्यकं साधनमपि। इदानीन्तने काले न केवलं भाषाप्राशस्त्यं क्षीणतामवाप्नोति, भावप्राधान्यताऽऽपि। अधुना अस्मिन् लोके दृश्यमानानां विपरीतस्वभावानां आचाराणां च मानवस्य यान्त्रिकमयजीवनमेव मूलभूतं कारणं अस्ति। वसुधाकुटुम्बजीवनेच्छा उत्तमा एव, किन्तु तत् जीवनम् मानव इव यापनीयं न तु मानवयन्त्र इव।

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम् ॥

——x——

विषयसूची

१. वर्षाविभूतिः

— शतावधानी डा. रा. गणेशः

मेघमषीमवलम्ब्य स्फुरत्तडिल्लेखनीं च वसुधापत्रे
वर्षोदबिन्दुवर्णैः प्रावृट्काव्यं नभो विलिखति रसार्द्रम् ॥ १ ॥

नक्षत्रक्षत्रसैन्यं क्षिपति घनघटा व्योमसङ्ग्रामभूमौ
हंसश्वेतातपत्रास्सपदि विगलिताः केकिघोटारभट्याम्।
वापीदुर्गाणि भित्वा कमलदलशिरांस्याशु धाराभिरर्दन्
वर्षाकालो जिगीषुर्ग्रसति सुनिपुणं राजतेजोऽतिवेलम्॥ २ ॥

सहस्रधाराङ्गुलिकाग्रभागैर्जीमूतमार्दङ्गिक एष हार्दम्।
आसारितं किं तनुते श्रुतीच्छुर्विद्युन्नटीनर्तनपूर्वरङ्गे॥ ३ ॥

रागानुयोगसुरकार्मुकनक्रवीणाम्
सौदामनीकररुहैरुपवीणयन्ती।
आसारतानमथ निस्तनितावनद्धै-
-र्वृष्टिस्ससर्ज सह शीकरसुस्वराग्रम्॥ ४॥

जरद्वारि महाब्धीनां भानुभैषज्यभावितम्।
कायकल्पतयाऽऽप्नोति प्रावृड्बिन्दुषु यौवनम्॥५॥

रहोरतिरहो भानोः कादम्बिन्यां यदम्बरे।
ऋजुरोहितरूपेण शृङ्गाररसतामगात्॥६॥

पृथिवीपुलकप्रख्ये सद्यस्सस्यप्ररोहणे।
मेने मेलनसार्थक्यां जलदागमनायकः॥७॥

वसुन्धरावधूवासस्तन्तुवायतयाऽनया।
प्रावृषा किं नु वाऽकारि पाणिवाणिपयोदया॥८॥

अन्तर्वप्रीसमज्यार्थमिव काननसीमनि।
हरिच्छटीचमत्कारा निपकङ्कणशृङ्खलाः॥९॥

अहल्यापि रसा हल्या समेति सुषमां तमाम्।
मोहितापि च शक्रेण महिता हि मही मुहुः॥१०॥

अवन्ध्यरत्नगर्भायास्सीतासीमन्तसीमनि।
सिन्दूरवारि सन्तूर्णमकार्षीन्नभसां पतिः॥ ११॥

नवगर्भवतीपृथ्वीदोहदार्थमिवाजनि।
तिक्तजम्बूफलश्रेणिश्शैले शैले वने वने॥ १२॥

रसदा प्रावृषि श्यामाः करकाभाः फलात्मना।
अधःपातभियेवाशु शिश्रियुर्जम्बुपादपान्॥ १३॥

धूलीखेलनमाकलय्य परितो निर्मथ्य कर्माकरान्
सालस्थूलविशाखिकाश्च सरयं निर्भज्य भीमस्वनः।
शान्तस्वच्छनदीनदह्रदजलं प्रक्षोभ्य चण्डानिलो
प्रावृट्कालपुरोहितो नु तनुते मातङ्गलीलोत्सवम्॥ १४॥

सन्तापनिर्वापणयन्त्रनालास्संस्थापिता विष्णुपदात्पृथिव्याम्।
कालेन किं कारुणिकेन वर्षाधारात्मना वारिदसाधनेन॥ १५॥

शक्रायुधस्खलनवेदितलात्सलीलम्
	भूमौ पतन्ति शिशुका इव वारिधाराः।
सौदामनीकनकदामकराः प्लवन्ते
	क्रीडालवो वियति वारिमुचां मिषेण॥ १६॥

निर्ह्रादिनीनां करताडनेन रिरंसवो व्योम्नि पयोदयोषाः।
स्खलत्तडित्काञ्चनकाञ्चिकाभिर्वर्षासु वासन्तविधिं वितेनुः॥ १७॥

आसारसारेण तुषारभासा जिगाय गौरीगुरुगौरभावम्।
तथा महासेनमयूरशोभां श्यामांबुदोऽसावृजुरोहितेन॥ १८॥

वाराशिकान्तं तरसाभिसर्तुं तरङ्गिणी मानवती सुदीर्घम्।
तत्त्वा निदाघे समवाप किं वा स्वपीठमर्दं स्तनयित्नुरूपम्॥ १९॥

कादम्बिनीकैरवनिर्गतानां शिलीमुखानां किल शीकराणाम्।
पर्यन्तभूमिः पथिकाङ्गनानां निरीक्षुनेत्रोत्पलकाननेषु॥ २०॥

नेयं पयोदपटली कुकुभाङ्गनानाम्
        कर्णोत्पलस्रुतरसेप्सुमिलिन्दमाला।
नो चेत्कथं तदुरुगुञ्जितमात्रमारा-
        -दाकर्ण्य यान्ति विवशा मधुमाससमुग्धाः ॥ २१ ॥

अन्वेष्टुमिव भास्वन्तं दुर्दिनेषु दिशान्तरे।
उन्नालान्युन्मूखान्येतान्यम्बुजानि वलन्ति किम् ॥ २२ ॥

निश्शेषं समशेषयद्घनमयीं विश्वम्भरां निर्दयम्
        संपूर्णं समतापयत्खरकरैस्सर्वंसहाप्राणिनः।
तस्मात्तीव्रतमेन शास्तृविधिना दन्ड्योद्यमार्ताण्ड इ-
        -त्युद्दण्डा विकटं रटन्ति पटवो भेका अनेकाशयाः ॥ २३ ॥

जलदशबरभीतो भानुमद्रोहितोऽसौ
        सपदि जटिलशम्पाजालमध्ये विलिल्ये।
अशनिपरिघदीर्णः क्वापि नष्टोऽतिकष्टं
        शशिनि गतमृगी तु क्वैति वा कां दशां वा ॥ २४ ॥

——x——

२. कविसमयाधिकारः

— डा. शङ्करः
(निम्हान्स् , बेङ्गलूरु)

यमर्थविशेषं परम्परागतमपरीक्ष्यैव कवयो निबध्नन्ति स कविसमय इति कथ्यते। अत्र न खलु व्यावहारिकः सदसद्विमर्शः प्रयोजनतामुपयाति। सरोवरकमलानीव कविसमयैकसुलभानि तटिनीकमलानि को वा व्यवस्यति च्छेत्तुम्। असत्त्वान्न कोऽपि। तत्कथमसन्तमपि सन्तमिति सन्तमपि विषयमसन्त-मिति कविसमयच्छद्मना प्रतिपाद्य लोकं प्रतारयन्तोऽपि स्तूयन्ते कवय इति नोक्तव्यम्। एष हि कविसमयश्चोरो निगृह्यतामित्यादिवन्न लौकिकमुपपादयति प्रयोजनम्। अलौकिकत्वसिद्धिरेव यदेतस्य फलम्। अनया च वर्णनीयस्य वस्तुनो विस्तार्यते व्याप्तिः। तथा हि दोहदसमयमङ्गीकुर्वता यावच्छक्यते वर्णितुमुपवनं पुष्पावचयो वा न तावदनङ्गीकुर्वता कविना। सहृदयानन्दप्रयोजना हि वर्णना। तस्मात्तत्त्वत आनन्दमेव प्रयोजनीकृत्य प्रवर्तते कविसमयः। आनन्दानुभवप्रमाणा च तस्य सत्ता। अत्र हि कविसमयस्य विषये बहु कथितमाचार्येण यायावरीयेण राजशेखरेण काव्यमीमांसायाम्। अशास्त्रीयोऽप्यलौकिकोऽपि सन् कविसमयस्तेन स्वीकार्यतामुपनीतः स्वर्ग्यो भौमः पातालीयश्चेति त्रिधाकृतस्त्रिष्वध्यायेषु पल्लवितश्च। अधस्तान्निशावर्णनव्याजादस्माभिः प्रस्तूयन्ते केचन कविसमयाः। अथ शनैः शनैर्विहितसोपान इव पूर्वाचलचूडा-मारुरोह रोहिणीवल्लभः। दिवसस्य रहस्यमिव रविमण्डलमर्णवो हृदयगतमकरोत्। बलभद्रहलाग्रयमुनाप्रवाह इव कुटिलाच्छशाङ्कशकलादुद्विजमानस्त्रिजगज्जनविवेको-

न्मथनजन्मना पापेन द्विगुणितमिव श्यामलिमानमादधानो दूराद्दूरतरमपससार तिमिरनिकरः। रजनीरमण्याश्चन्द्रातपहसितेन विकसिता चम्पकसम्पदिव ददृशे दीपश्रेणी। सर्वासु दिशासु चक्रवाकदम्पतीसाहचर्यसूत्रच्छेदकर्त्तरी प्रससार चन्द्रिका। न्यमज्जन्निव कीर्तयो राज्ञामपारे चन्द्रिकापूरे। न स्मितानि व्यभाव्यन्त। ऐरावतभावमवापुरखिला दिग्गजाः। वैमानिकवधूनिकरकरापचेयास्ताम्रपर्णी-मुक्ताफलबलक्षा लक्षाधिकास्तत्र तत्र नभस्तरुकुसुमसदृक्षा ऋक्षा व्यराजन्त। मिहिरोदयैकव्यपनेयमन्धकारमिव पुष्पन्धयमन्तर्बबन्ध कुड्मलिता कमलिनी। व्यपगतनिद्रा च कुमुदिनी मङ्गलादर्शमिव बभार सलिलगतं प्रतिमाहिमांशुम्। विमुक्तपुष्पाभरणा सस्नौ ज्योत्स्नापयसि शेफालिका। चन्द्रिकापायिनो विरहिणीना-मुपाकुर्वन्निव चकोरकाः। सर्वत्र तुष्यति जीवलोके ग्रावभावमपहाय सरसता-मधिगन्तुमिव दद्रुवुश्चन्द्रकान्तमणयः। विधोरङ्कमृगस्य वशीकरणाय क्वापि क्वापि गीतमगीयत गन्धर्वमिथुनैः। मानापगमेऽपि रागानुबन्धेन पुनरपि शोणि-मानमुपगतासु दयितादृष्टिषु चिरादजायत कामिनां प्रत्ययः। चन्द्रिकया दीपप्रभया च निरुद्धबहिरन्तःप्रसरो नीलपट इव मन्दिरवातायनेषु तस्थावन्धकारः। त्रिभुवनजनलोचनचातकव्रातकमनीयस्य निशाकादम्बिनीसलिलबिन्दोरिन्दोः किरणैरुद्दीपिताभिरोषधिभिरलातयष्टिभिरिव तिमिरमवारयन्नद्रयः।

श्रीखण्डशिशिरे शशिरेखाप्रकाशे सर्वत्र वहति मलयमहीधरावासरसमन्वभव-न्निखिलानि भूतानि। जलदेवतानामिन्दूदयदिदृक्षया बहिरुद्गतानामपाङ्गपातैरिव विकचनीलोत्पलैरशोभन्त काश्चन दीर्घिकाः। त्रिभुवनजयिनो देवस्य मकरकेतो-रुपरि कौमुदीकैतवान्निपपात नभस्तो निरन्तरा कुन्दकुसुमवृष्टिरिव।

उपरितने वर्णनविशेषे ये सन्ति कविसमयास्तेषामधस्तादानुपूर्वीमङ्गीकुर्वद्भि-रस्माभिरेवमुल्लेखो विधीयते-

१. पापेन द्विगुणितमिव श्यामलिमानमित्यत्र पापस्य कार्ष्ण्यमेकता च श्यामकृष्णवर्णयोः।

२. रजनीरमण्याश्चन्द्रातपहसितेन विकसिता चम्पकसम्पदित्यत्र रमणीनां पटुमृदुहसनाच्चम्पको विकसतीति दोहदसमयः।

३. चक्रवाकदम्पतीसाहचर्यसूत्रच्छेदकर्त्तरी प्रससार चन्द्रिकेत्यत्र चन्द्रोदये चक्रवाकमिथुनस्य वियोगः।

४. न्यमज्जन्निव कीर्तयो राज्ञामपारे चन्द्रिकापूर इत्यत्र यशसः शौक्ल्यम्।

५. न स्मितानि व्यभाव्यन्तेत्यत्र धवलता स्मितस्य।

६. ताम्रपर्णीमुक्ताफलबलक्षा इत्यत्र नदीषु ताम्रपर्ण्येव मुक्ताफलानामुत्पत्ति-स्थानमिति नियमः।

७. नभस्तरुकुसुमसदृक्षा इत्यत्र कुसुमानां सामन्यतो धवलवर्णता।

८. कुड्मलिता कमलिनीत्यत्र निशासु कमलिन्या निमीलनम्।

९. व्यपगतनिद्रा कुमुदिनीत्यत्र निशासु कुमुदिन्या विकासः

१०. विमुक्तपुष्पाभरणा शेफालिकेत्यत्र निशासु पुष्पस्रंसनं शेफालिकायाः।

११. चन्द्रिकापायिनश्चकोरका इत्यत्र चकोरपक्षिणां चन्द्रिकापानम्।

१२. दद्रुवुश्चन्द्रकान्तमणय इत्यत्र चन्द्रकरस्पर्शेन द्रवीभवनं चन्द्रकान्तमणेः।

१३. विधोरङ्कमृगस्येत्यत्र चन्द्रस्य कलङ्के मृगरूपारोपः।

१४. मानापगमेऽपि रागानुबन्धेन पुनरपि शोणिमानमुपगतासु दयितादृष्टिष्वित्यत्र मानरागयो रक्तवर्णता।

१५. नीलपट इव मन्दिरवातायनेषु तस्थावन्धकार इत्यत्र नीलकृष्णयोरैक्यम्।

१६. त्रिभुवनजनलोचनचातकव्रातकमनीयस्य निशाकादम्बिनीसलिलबिन्दोरिन्दोरित्यत्र चातकस्य मेघजलोपजीवित्वम्।

१७. श्रीखण्डशिशिरे शशिरेखाप्रकाशे सर्वत्र वहति मलयमहीधरावासरसमन्वभवन्निखिलानि भूतानीत्यत्र मलयशैल एव चन्दनतरव इति नियमः।

१८. अपाङ्गपातैरिव विकचनीलोत्पलैरशोभन्त काञ्चन दीर्घिका इत्यत्र कटाक्षाणामसितवर्णत्वं निशासु च नीलोत्पलविकासः। एष समासेन सोदाहरणं प्रस्तुतः कविसमयाधिकारः। ये खलु कवयः स्वाधीनकविसमयरहस्यास्ते नियतमाशुपद्यरचनास्वपि न यान्ति प्रतिभादरिद्रताम्।

——x——

३. ”मंकुतिम्मनकग्ग”काव्यानुवादः

— जि.एस्.श्रीनिवासमूर्तिः
(विश्रान्तमार्गदर्शकः,
टेलिकम्युनिकेषन् विभागः,
भारतसर्वकारः)

डिविजि महोदयस्य कन्नडभाषायां रचितात् ”मंकुतिम्मनकग्ग”काव्यात् उद्धृतस्य श्लोकचतुष्टयस्य अनुवादः।

शैले तृणं भव गृहे भव मल्लिका त्वम्
कृच्छ्राणि वर्षति विधौ उपलो भव त्वम् ।
दीनस्य दुर्बलजनस्य तु शर्करा त्वम्
युक्तो भवाखिलजनैस्सह मूढतिम्मो ॥१॥

चित्ते स्वलाभपरता जठरे बुभुक्षा
तालाद्वयं सुनिभृतं खलु सृष्टियन्त्रे ।
उन्मूलयन्नुडुगणान् रचयन्श्च कोटान् ।
तत्त्वां करोत्यनृजुं बत मूढतिम्मो ॥२॥

कस्मिन्श्चिदन्धविपिने प्रकृतिः प्रसूने
वल्ल्याः स्वचित्ररचनाप्रतिभां प्रयुङ्क्ते ।
कुर्वन्ति ये गुणमयं सकलं स्वकर्म
ते जीविते हि कृतिनः खलु मूढतिम्मो ॥३॥

बालस्य वातिजरठस्य पुराणिकस्य
रूपे स्पृहास्ति न हि कस्य पुरोहितस्य ।
सर्वे समीक्ष्य मुकुरे रहसि स्वबिम्बम्
कुर्वन्ति वक्रविकृतिं खलु मूढतिम्मो ॥४॥

——x——

४. स्तोत्रावलिः

— हरि वेङ्कट साम्राज्य श्री पवनकुमारः
(संशोधकविद्यार्थी, विद्युद्विभागः)

विघ्नेशं प्रणतोऽस्म्यहं शिवसुतं सिद्धीश्वरं दन्तिनम्
गौरीनिर्मितभासमानवपुषं श्वेतार्कमूलस्थितम् ।
सर्वारम्भणपूजितं द्विपमुखं दूर्वासमिज्याप्रियम्
मूलाधारनिवासिनं च फणिना बद्धोदरं बुद्धिदम् ॥१॥

श्वेताम्भोरुहवासिनीप्रियमनाः वेधाश्च वेदात्मकः
श्रीकान्तस्स्थितिकारकः स्मरपिता क्षीराब्धिशय्याहितः ।
चन्द्रालङ्कृतमस्तको गिरिजया पृक्तात्मदेहश्शिवः
ते लोकत्रयवन्दितास्त्रिपुरुषाः कुर्युर्महन्मङ्गलम् ॥२॥

संसारार्णवतारणोद्यमरताः प्रापञ्चिकानन्दगाः
ज्ञानाब्धिं विभुमाश्रयन्ति चरमे नित्यं सदानन्ददम् ।
आप्रत्यूषविहारिणो गगनगाः नैकाः मनोज्ञाः स्थलीः
वीक्ष्यान्ते हि निशामुखे वसतरुं गच्छन्ति चन्द्रद्युतौ ॥३॥

——x——

५. श्रीमच्चन्द्रशेखरभारतीदशकम्

— अपर्याप्तामृतः
(संशोधकविद्यार्थी,
वैमान्तरिक्षविभागः)

वन्दे ब्रह्मविदां श्रेष्ठं वीतरागिणमद्वयम् ।
अन्तर्मुखरसोन्मग्नं चन्द्रशेखरदेशिकम् ॥ १ ॥

शमादिगुणसम्पन्नं ज्ञानाभ्यासपरायणम् ।
सर्ववेदान्तसारज्ञं प्रपद्ये चन्द्रशेखरम् ॥ २ ॥

शिवाभिनवशिष्यं तं विद्यातीर्थसुपूजितम् ।
व्याख्यानासनभूषितं प्रपद्ये चन्द्रशेखरम् ॥ ३ ॥

वैराग्यनिधनं धीरं जितबाह्यसुखस्पृहम् ।
आत्मारामं सदा वन्दे चन्द्रशेखरभारतीम् ॥ ४ ॥

निर्विकल्पसमाधिस्थं द्वैतदृष्टिविवर्जितम् ।
शान्तं शिवं गुरुं वन्दे चन्द्रशेखरभारतीम् ॥ ५ ॥

कृतभाष्यं महात्मानं चूडामणिं विवेकिनाम्।
कल्याणगुणसम्पूर्णं भावये चन्द्रशेखरम्॥ ६ ॥

अविद्याकृतदृश्यघ्नं चित्तशुद्धिप्रदायकम्।
आत्मज्ञानोपदेष्टारं भावये चन्द्रशेखरम्॥ ७॥

परहंसं स्थितप्रज्ञं चिन्मुद्राविलसत्करम्।
अद्वितीयपरात्मानं चन्द्रशेखरमाश्रये॥ ८॥

कृतसर्वतपश्चर्यं प्रत्यग्याथात्म्यनिश्चितम् ।
आत्मब्रह्मैक्यनिष्ठं श्रीचन्द्रशेखरमाश्रये॥ ९॥

निर्विशेषं निराकारं सत्यासत्यविलक्षणम्।
परमानन्दचिद्रूपं प्रपद्ये चन्द्रशेखरम् ॥ १०॥

——x——

६. कर्म वा स्वधा वा

— अभिरामशर्म लोहितः
(संशोधनसाहाय्यकः,
वैमान्तरिक्षविभागः)

किंस्विद्गुरुतरं कर्मस्वधयोरनयोस्सखे।
किमाश्रित्य मनुष्यस्य जीवितं साधितं भवेत्॥ १॥

जन्मनि जन्मनि यद्यच्चेष्टितं कार्यं भुवि।
मानवैस्सुकृतमुताहो दुष्कृतं कार्यं कृतम्॥२॥

कृतस्यैव हि कार्यस्य तस्योदयते तु फलम्।
सद्ये वा जन्मन्यथ वा जन्मस्वागामिनेषु वै॥३॥

यानि कर्माणि सद्यैव फलायन्ते स्वरूपतः।
तानि व्यावहारिकाणि कथ्यन्ते भौतिकानि वा॥४॥

तान्यपराणि कर्माणि अव्यावहारिकाणि तु।
येषां नैव फलं प्राप्तमिदानीन्तनजन्मनि॥५॥

तेषां फलसमूहं हि दैवमित्यपि कथ्यते।
प्रारब्धसञ्चितागामिन् विभक्तं हि कर्म त्रिधा॥ ६॥

पूर्वाणां हि जन्मनां यत्कर्मणां प्रारभ्यते तत्।
फलमधुना जन्मनि प्रारब्धमभिधीयते॥ ७॥

पुनः पूर्वाणां जन्मनां जन्मन्यागामिनि हि यत्।
कर्मफलविकसनं ज्ञातस्तदागामिनीति॥ ८॥

यदद्यावधिजन्मनि क्रियते कर्माणि पुमान्।
क्रियते फलसञ्चयं भविष्याय तत्सञ्चितम्॥ ९॥

अन्या त्वेभ्यो सा ज्ञाता या स्वधेति कथिता हि।
स्वेच्छा त्वस्यापरं नाम स्मृता चात्मशक्तिरिति॥ १०॥

ममैवेयमस्ति बुद्धिर्ममैवाप्यस्तीदं मनः।
चित्तञ्च मे स्मृतिश्च मे ममैव जीवितमिदम्॥ ११॥

यद्यत्कार्यं सङ्कल्पये तत्तदेवाचराम्यहम्।
यत्स्वहस्तगतान्येव सर्वाणि निश्चयानि वै॥ १२॥

अतो कुत्रचिन्नैव दैवहस्तक्षेपं दृश्यते।
यद्यत्कार्यमाचरितं मया स्वेच्छाशक्तिना।
तस्यतस्यैव जानन्हि सम्यगाचरामि फलम्॥ १३॥

कोऽस्ति दर्शय हे सखे तादृक्कर्मवान् पुमान्।
यस्य स्वकर्मणा जातु स्वकल्याणं न कुरुते॥ १४॥

तत्त्वन्यः विषयो हि यत्किंकिं कल्याणकरं भुवि।
परमेकैकोऽपि नरो स्वे स्वे कल्याणे नियुङ्क्ते॥ १५॥

अपि प्राप्स्यति स्वस्य विपाकसमये फलम्।
इत्येवं प्रवर्तितं लोकमागच्छति दैवं कुतः॥ १६॥

आलस्यस्यैव साक्षात्ते ये के दैवपरायणाः।
मूर्तयोऽप्रयत्नशीलाः यद्भवति भवत्विति॥ १७॥

कथं वयं विजानामो यत्पूर्वमपि जन्मिनः।
न कमपि पश्यामः यो पूर्वजन्म स्मर्यते॥ १८॥

इदं जन्म प्राप्तमस्मिन् कर्मन्यधिकारश्च मे।
वित्तार्जनं करिष्ये सौख्यं जीवनं नयिष्ये॥ १९॥

तर्हि कुतोऽयमागच्छत्पूर्वजन्मफलभोजनम्।
यस्मिन्नः नैव जानामो कानि कृतानि कर्माणि॥ २०॥

एवंविधं हि चिन्तनं तेषां ये स्वेच्छजा इव ।
पुनः प्रश्नमुदीषति किमेतयोर्बलीयसम्॥ २१॥

अपीदं सत्यमेव यल्लोके कश्चिद्दरिद्रो हि।
स्वाकिञ्चनत्वं कर्मणि स्वस्याध्यारोपयति॥ २२॥

अहो किञ्चित्महापापं विसृष्टं हस्ताभ्यां मम।
पूर्वजन्मन्यतो दैन्यभागिति तिष्ठति चिन्तयन्॥ २३॥

पुनः स पुमान्यो लक्ष्मीं निवासयति शाश्वतम्।
नदत्येव स्वैश्वर्ये किमस्ति चिन्ताकारणम्॥ २४॥

बतास्माभिर्परिश्रमं यथाशक्तिर्हि कार्यते।
तर्हि यथापरिश्रमं वित्तं भुञ्जाम स्वार्जितम्॥ २५॥

कश्चिदुद्योगिनं पुरुषमागच्छेत यशः क्वचित्।
अहो महासौभाग्यं ममास्तीति स नन्दति॥ २६॥

पुनस्तादृक् श्रमी कर्मी नैव प्राप्येत तद्यशः।
किमर्थं श्रमणं कार्यं मया निर्गतभाग्येन॥ २७॥

आतपतापपजले कस्मिंश्चित्काननह्रदे।
जीवापायसम्मुखोऽसौ झषराजोऽस्ति किङ्करः॥ २८॥

सन्त्यत्रतत्रैव केचित् क्षुद्रक्षुद्रा जलाशयाः।
अस्मादुत्प्लुत्य जलाशयादमुकं मीनः गच्छति॥ २९॥

नैव जानाति तन्मत्स्यो उत्कूर्दन्नितस्ततः।
कतमः जलाशयः श्रेष्ठः कोऽस्ति नीरबहुलः॥ ३०॥

तर्ह्यपि प्रयत्नशीलो आशावाननवसादी।
अन्वेष्टव्यं विशालतरमन्यमेव जलाशयम्॥ ३१॥

इति निश्चित्य सुदृढं गच्छेन्नैव दैववशम्।
यदि भाग्यवानस्ति मत्स्यः जीविष्यति पुनस्सरे।
यदि नैव दैवजुष्टः विवशः म्रियते पुनः॥ ३२॥

अप्येतादृग्भवेद्यस्मात्पुमान् प्रेयं न प्राप्नुयात्।
श्रेयो हि लब्धस्तेनैव विना याच्यमानेन॥ ३३॥

अतो नैव सर्वदा हि दैवं दुष्येन्मानवः।
कदाचिद्वरतरं दैवं तुल्यमानं तु स्वेच्छया॥ ३४॥

तापं यच्छेज्जलं यच्छेन्नैवातिमात्रमुभयोः।
तदा सस्यः भवेद्द्रुमः अथवा मरणमियात्॥ ३५॥

स्वधया कुर्यान्नरः कर्म दैवं चाप्यनुसरेन्नरः।
उभयोर्यन्मिश्रितं फलं जानीयात्तं श्रेष्ठं सिद्धिदम्॥ ३६॥

॥ इति "कर्म वा स्वधा वा" नामकं पद्यम् ॥

——x——

७. संन्यासेच्छा

— संस्कृतसङ्घः

एतत् नाटकम् गुरुपूर्णिमामहोत्सवसन्दर्भे प्रदर्शितम्।

पात्राणि -

१. संन्यासाभिलाषी (स)

२. संन्यासाभिलाषिनः भ्राता (भ्रा)

३. संन्यासाभिलाषिनः पिता (पि)

४. संन्यासाभिलाषिनः मित्रम् (मि)

५. वास्तवसंन्यासी (नि)

६. चोरसंन्यासी (चो)

७. चोरसंन्यासिनः भक्तः "अमुकः" (अ)

वेदिकायां द्वौ आसन्दौ स्तः। (स), (मि) च उपविशतः। एकस्यां उत्पीठिकायां पुस्तकानि स्थापितानि।

स - मित्र! लोके बहवः जनाः अनेकानि कष्टानि अनुभवन्ति। केचन जनाः एव सुखिनः सन्ति। एतस्य कारणं किम्??..."जनानां विवेकलोपः"। इदानीं लोकोद्धाराय समयः आगतः। सर्वे जनाः ज्ञानवन्तः भवेयुः।

मि - तत् कथं भवति?

स - अस्माभिः संन्यासः स्वीकरणीयः। भगवद्गीतायां किं उक्तम्? "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥" इति संन्यासः एव प्रशंसितः। एतस्य अर्थः कः? अस्माकं सर्वाणि कार्याणि विसृज्य भगवद्ध्यानं करणीयम् इति। (अन्यः श्लोकः आवश्यकः।) अतः अहं संन्यासी भूत्वा मोक्षं प्राप्नोमि।

मि - यदि एतत् सर्वं पठितव्यं न भवति चेत्, अहमपि मोक्षं प्राप्तुमिच्छामि। अहमपि संन्यासी भवामि।

— दृश्यपरिवर्तनम् —

वेदिकायां पिता आसन्दे उपविशति। तस्य समीपे भूमौ (स) उपविशति। अन्यत्र (भ्रा) वैद्यः इव अभिनयं करोति।

स - तात! एतेन पुस्तकपठनेन किं प्रयोजनम्? मयापि या काऽपि वृत्तिः स्वीकरणीया। ततः अहमपि संसारी भूत्वा चिन्ताकुलः भवामि। भवान् अपि तथैव अस्ति खलु! (तातः क्रोधं नाटयति।) भवान् सर्वदा मद्विषये एव - "सम्यक् पठिष्यति वा, प्रयोजकः भविष्यति वा न वा?" इति चिन्तयन् नितरां

मनोवेदनां प्राप्नोति। अतः अहं संन्यासं स्वीकर्तुमिच्छामि। तत् कथं स्वीकरणीयं, संन्यासिनः धर्माः के इति कृपया वदतु।

पि - (कुपितः उच्चैः तर्जयन्) मूर्ख! स्थगयैनं उन्मत्तप्रलापम्! प्रथमं तव अध्ययने निमग्नः भव। तव भ्रातरं पश्य(भ्रातरं दर्शयति)। सः अतीव परिश्रम्य आयुर्वेदवैद्यः अभवत्। सः कीदृशः सेवातत्परः अस्ति? संन्यासस्वीकरणं इत्युक्ते बालक्रीडा न। तत् त्वत्सदृशानां अलसानां दुर्लभं, दुस्साध्यं च। संन्यासं विस्मर। अध्ययनं कुरु। (गच्छति)

— दृश्यपरिवर्तनम् —

वेदिकायां द्वौ आसन्दौ। (स), (मि) च उपविशतः।

स - मित्र। मम पिता संन्यासस्वीकरणार्थं अनुमतिं न दत्तवान्। ह्यः एकः संन्यासी अस्माकं नगरं आगतवान् इति मया श्रुतम्। बहवः जनाः तस्य समीपं गच्छन्ति। सः महान् ज्ञानी, सिद्धपुरुषः इत्यपि श्रुतम्। आवामपि तत्र गत्वा ज्ञानं प्राप्नुवः।

मि - आम्! निश्चयेन गमिष्यावः।

— दृश्यपरिवर्तनम् —

मित्रे द्वे वास्तवसंन्यासिनः समीपं गच्छतः।

वेदिकायां एकस्मिन् आसन्दे वास्तवसन्यासी उपविष्टः। मित्रे तं साष्टाङ्गं प्रणम्य -

स - महात्मन्! भवान् मम आदर्शपुरुषः। अहं...

मि - अहमपि... अहमपि...।

स - आ! आवां संन्यासं स्वीकर्तुमिच्छावः।

नि - किमर्थं इच्छसि?

स - मोक्षं प्राप्तुमिच्छामि।

नि - (परीक्षितुं) मोक्षस्य अर्थः कः?

स - मोक्षः इत्युक्ते भगवदैक्यं प्राप्य, आनन्देन जीवनं करणीयम्।

नि - (परीक्षितुं पुनः) आनन्दः कः?

स - आनन्दः इत्युक्ते - पुस्तकपठनं न भवेत्, अङ्कप्राप्तिः, तस्यकृते तर्जनं - एतत्सर्वं न भवेत्। किमपि कार्यं न करणीयम्। सुखेन जीवितव्यम्। एष एव आनन्दः।

नि - (हसित्वा) त्वया आनन्दस्य, मोक्षस्य, संन्यासस्य च अर्थः सम्यक् न अवगतः। अपि च, भगवदैक्यं इति उक्तवान्। अहं एकं प्रश्नं पृच्छामि। उत्तरं वदतु। भगवान् सर्वान्तर्यामी इति त्वं अङ्गीकरोति वा?

स,मि - आम्...। भगवान् सर्वत्र सर्वेषु च अस्ति।

नि - तर्हि ये जनाः कष्टानि अनुभवन्ति, तेष्वपि भगवान् अस्ति खलु!

स,मि - आम्...। अस्ति।

नि - यदि त्वं भगवदैक्यं प्राप्नोति, तर्हि भवान् अपि सर्वान्तर्यामी भूत्वा कष्टानि अनुभविष्यति खलु!

स - (मित्रं) एषः उन्मत्तसंन्यासी इव भासते। आवाभ्यां इतः शीघ्रं पलायितव्यम्।

अन्यसंन्यासिनः समीपं गच्छावः। (वास्तवसंन्यासिनं प्रति) भगवन्! बहवः धन्यवादाः। आवयोः ज्ञानोदयः अभवत्।

— दृश्यपरिवर्तनम् —

चोरसंन्यासी वेदिकायां एकत्र तिष्ठति। तस्य पुरतः तस्य भक्तः "अमुकः" तिष्ठति।

अ - महात्मन्! मम गृहे अहं बहुकष्टं अनुभवन् अस्मि।

चो - किं कष्टम्? किमपि भवेत्। पिता सर्वं निवारयिष्यति।

अमुकः सन्देहं प्रदर्शयति। वक्तुं उद्युक्तः भवति। किन्तु न वदति।

चो - चिन्ता मास्तु। उपरि पिता अस्ति। अधः त्वं असि। मध्ये अहं अस्मि। सर्वं सम्यक् भवति। वदतु।

अ - मम भार्या मां प्रतिदिनं तर्जयति, ताडयति च। अतः अहं दुःखितः अस्मि।

चो - (स्वगतम्) एषः अपि मम समस्यां एव प्राप्तवान्, यस्मात् कारणात् अहं संन्यासी अस्मि।

चो - (अमुकं) चिन्ता मास्तु। अहं पितरं पृच्छामि किं करणीयं इति। भवान् नेत्रे निमील्य तिष्ठतु। पिता...(घोषणम्)।

निम्बाफलं हस्ते उद्भवितं इव नटयति।

चो - अमुक! एतत् स्वीकुरु। (निम्बाफलं ददाति।) तव भार्यायाः कण्ठे बन्धय यदा सा जागृता अस्ति। सर्वं सम्यक् भवति। गुरुदक्षिणां दत्वा प्रणम्य गच्छ।

अमुकः तथैव कृत्वा गच्छति।

यः कोऽपि - कुपितायाः भार्यायाः कण्ठे कथं वा सः बध्नाति?
चो - मूर्ख! यदि अहं अन्यत्र स्थापयितुं वदामि चेत् सः तथैव करोति। फलं तु निश्चयेन न प्राप्नोति। परन्तु पुनः अत्र आगच्छति। अतः कण्ठे बन्धयितुं उक्तवान् यत् तेन न शक्यम्।

घटं भिन्द्यात् पटं छिन्द्यात् कुर्यात् रासभारोहणम्।
येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत्॥

(स), (मि) च प्रविशतः।

स - स्वामिन्! आवां भवतः माहात्म्यं श्रुत्वा अत्र आगतवन्तौ। अहं...
मि - अहमपि... अहमपि...।
स - आ! आवां संन्यासं स्वीकर्तुमिच्छावः।
चो - पिता...(घोषणम्)। पिता एषः बहु सम्यक् विचारः इति वदति। भवन्तौ उचितसमये समुचितनिर्णयं स्वीकृतवान्तौ। परन्तु संन्यासस्वीकारः सामान्यविषयः न। तस्य कृते बहु परिश्रमः (अभिनयः, धनं) कर्तव्यः।
स - परिश्रमः वा!? विना परिश्रमेण कर्तुं न शक्यते वा?
चो - परिश्रमः भवितव्यः एव। 'काञ्चनं कर्मविमोचनम्' इति उपनिषद्वाक्यः अस्ति खलु!
स - ओ! सः परिश्रमः वा! कियान् परिश्रमः कर्तव्यः?
चो - यावान् उत्साहः तावान् परिश्रमः। यदि आगामिनि सप्ताहे एव स्वीकर्तुं इच्छति चेत् एतावान् परिश्रमः आवश्यकः। आगामिनि मासे एव स्वीकर्तुं इच्छति

चेत् एतावान् परिश्रमः आवश्यकः।

स - आवाभ्यां शीघ्रमेव संन्यासः स्वीकरणीयः। अतः आगामिनि सप्ताहे एव स्वीकरिष्यावः। अनुज्ञां दीयताम्।

साष्टाङ्गं प्रणम्य गच्छतः।

— दृश्यपरिवर्तनम् —

मि - मित्र! तावत् धनं आवां कथं प्राप्नुवः?

स - (धनार्जनविषये श्लोकः) धनं सम्पादयितुं बहवः मार्गाः सन्ति। अहं एकं उपायं चिन्तितवान्।

— दृश्यपरिवर्तनम् —

वेदिकायां एकत्र पिता सुप्तः अस्ति। तस्य कोशात् (स) धनं स्वीकृत्य (चो)ः ददाति। एतेन सह (मि) अपि गच्छति। पञ्चदिनपर्यन्तं एतत् कार्यं चलति। पञ्चमे दिने यदा (स) धनं दत्वा गृहं आगच्छति तदा (चो) पलायनं करोति। षष्ठे दिने पिता (स) हस्तं गृह्णाति, यदा (स) चौर्यं कुर्वन् अस्ति।

पि - (कुपितः) भ्रष्ट! चौर्यमपि करोति वा त्वम्? कीदृशः अधमः अभवस्त्वम्?

स - तात! अहं संन्यासी भवितुं इच्छामि! तस्य कृते बहु परिश्रमः करणीयः इति एकः संन्यासी उक्तवान् (धनं दर्शयति)। अतः अहं...

पि - मूढ! प्रत्युत्तरं वदति चेत् ताडयामि। अध्ययनभीतः, अलसश्च भूत्वा कियन्तं अनर्थं कुर्वन् अस्ति? त्वमेव निष्प्रयोजकः। एषस्तु तव अनुयायी। ईदृशः अयोग्यः मम पुत्रः इति वक्तुं अहं लज्जितोऽस्मि। तव बुद्धिः कथं सम्यक् करणीया इत्यहं न जाने। ...आगच्छ!

— दृश्यपरिवर्तनम् (अन्तिमः दृश्यः) —

(पि), (स), (मि) च वास्तवसंन्यासिनः समीपं गच्छन्ति।

पि - स्वामिन्! मम पुत्रः बुद्धिभ्रष्टः। एषः अलसः, अध्ययनभीतस्सन् संन्यासी भवामि इति प्रलपति। यस्य कस्यापि वचनं श्रुत्वा चौर्यमपि कृतवान्। कृपया एतस्य ज्ञानोदयं कुर्वन्तु।

नि - वत्स! अहं तस्मिन् दिने एव उक्तवान् यत् मोक्षस्य, आनन्दस्य, संन्यासस्य च विषये तव चिन्तनं लोपभूयिष्टम् अस्ति इति। मोक्षं साधयितुं केवलं संन्यासस्वीकरणम् एव मार्गः न, अपि च संन्यासस्वीकरणं कष्टसाध्यम् अस्ति।अरिषड्वर्गं जेतुमेव कठोरनिष्ठा आवाश्यकी। संन्यासिनः अपि ज्ञान-समुपार्जनार्थं पठनं, ध्यानादि कर्माणि कुर्वन्ति। लौकिकज्ञानं प्राप्तुं यत् विद्याध्ययनं आवश्यकं तदेव कर्तुं त्वं अनासक्तः, अलसश्च असि। तर्हि भवान् कथं वा संन्यासी भवितुं शक्नोति? आनन्देन जीवितुं सुलभः मार्गः कर्मयोगः। अतः यत्कर्म ते विहितमस्ति, तदाचर!

"आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः" इति आर्योक्तिः अस्ति। अतः आलस्यं त्यज! विद्यासक्तः भव। तव पिता अपि सन्तुष्टः भविष्यति। (हस्तं

शिरसि स्थापयित्वा) शुभं भूयात्।

<u>स</u> - (नष्टो मोहः...) महात्मन्! क्षम्यतां मे अपराधः। अज्ञानिना मया बहवः दोषाः कृताः। सर्वे मम सन्देहाः इदानीं निवारिताः। अद्य प्रभृति अहं भवतः आशीर्वाक्यं श्रद्धया पालयामि। धन्यवादः। (अज्ञानिना मया...)

<u>पि</u> - स्वामिन्! वयं अनुगृहीताः स्मः। धन्यवादः। अनुज्ञां दीयताम्।

<u>नि</u> - अनुज्ञा मया न, भवता देया। शिष्य! अत्रागच्छ! (पिता आश्चर्यचकितः भवति।) भवतः ज्येष्ठपुत्रे अहं अचञ्चलां निष्ठां, उत्तमविचारधारां, एकाग्रचित्ततां च दृष्टवान्। अपि च असौ, समुन्नतं अध्यात्मशिखरं च प्राप्तुम् अर्हति। अतः एषः मम शिष्यः भवेदिति मम आकाङ्क्षा अस्ति। तस्मै अनुज्ञा दीयताम्।

<u>पि</u> - धन्योऽस्मि महात्मन्।

<u>नि</u> - सर्वे जनाः सुखिनो भवन्तु।

——x——

८. मार्जालस्य दमनम्

— संस्कृतसङ्घः

एतत् नाटकम् गुरुपूर्णिमामहोत्सवसन्दर्भे प्रदर्शितम्।

पात्राणि -

१. शुनकः(शु)

२. मूषिका (का)

३. गूगुलः(गू)

४. मूषकः (कः)

५. मार्जालः (लः)

६. मार्जाली(ली)

कराळामावास्यारात्रिः. . . . एकः शुनकः इतस्ततः भ्रमन् अस्ति। तस्मिन् समये समीपस्थितात् गुल्मात्. . . . (मूषिकायाः रोदनम्)

शु(स्वगतम्) - एका मूषिका रोदनम् कुर्वन्ती अस्ति।

शु - हुम्! किमर्थं रिदिति?

<u>का</u> - चिक्. . . चिक्. . . (रोदिति)। मम सखा. . . (पुनः रोदिति)।

<u>शु</u> - भवत्याः सखा. . . ? किमभवत् तस्मै ? (हूङ्कारेण सह)

<u>का</u> - मम सखा. . . (किञ्चित् मौनम्) मार्जालेन अपहृतः।

<u>शु</u> - ओ!?. . . केन. . .? मार्जालेन वा ? ओ हो ! कुत्र नीतवान् ?

<u>का</u> - न जाने. . . (पुनः रोदिति)।

<u>शु</u> - हुम्! अस्तु। अहं पश्यामि किं कर्तव्यमिति। भवती मम निलये तिष्ठतु।

मूषिका गच्छति। शुनकः समीपस्थितस्य गिरेः उपरि गच्छति। बुक्कनं कुर्वन् अन्यान् शुनकान् एतं विषयं कथयति।

— दृश्यपरिवर्तनम् —

हा ! सर्वेऽपि गूगुलं जानन्ति एव। आ. . . भवन्तः न जानन्ति खलु ! अस्तु, गूगुलस्य परिचयं कारयामि। गूगुलः अन्वेषणकार्ये सिद्धनासिकः। सः 'नासिकान्वेषणधुरीणः' इति पुरस्कारं अपि प्राप्तवान्।

हा ! एतं अपहरणविचारं ज्ञात्वा सः मूषिकां मेलितुं आगतवान्।

(अस्मिन् समये गूगुलः आगन्तव्यः (जेम्स् बाण्ड् ध्वनिः।))। सः इतस्ततः आघ्राणं कुर्वन् आगत्य मूषिकां पश्यति। मूषिका किमपि वक्तुं प्रयत्नं करोति। तदा. . .)

<u>गू</u> - (नासिकयाः उपयोगः करणीयः।) मास्तु। मास्तु। किमपि मा वदतु। अहं सर्वं आघ्राणितवान्। अहं भवत्याः सखायं निश्चयेन आनेष्यामि। चिन्ता मास्तु।

अहं गच्छामि। विजयी भूत्वा आगमिष्यामि।
(गूगुलः आघ्राणनं कुर्वन् गच्छति।(गमनसमये पुनः जेम्स् बाण्ड् ध्वनिः।))

— दृश्यपरिवर्तनम् —

(गूगुलः आघ्राणनं कुर्वन् प्रविशति। (मिषन् इम्पासिबल् ध्वनिः।))
वेदिकायां एकत्र मार्जालः एकस्मिन् पात्रे जलं स्थापयति। तस्य पात्रस्य अधः काष्ठं स्थापयित्वा अग्निं ज्वालयति। मूषकं सूत्रं उपयुज्य बद्धा पात्रस्योपरि लम्बयति।
ल: - (उग्रदृष्ट्या मूषकं पश्यन्. . . वङ्. . . इति उग्रा ध्वनिः करणीया।)
अहो ! अद्य कियत् सुदिनम् !!! मम बहु इष्टं आहारं एतं मूषिकं हनिष्यामि। सम्यक् क्वथयिष्यामि। सन्तोषेण खादिष्यामि। (. . .विकृतहासम्. . .) अवश्यं हनिष्यामि।
क: - (चिक् चिक् . . . वीरस्वरेण) रे दुष्टबिडाल ! अलमलं अधुना प्रलापेन। एकवारं एतत्सूत्रमपनय। अनन्तरं पश्य।
ल: - हा. . हा. . हा. . । सूत्रमपनयामि चेत् किं पश्यामि ? भवान् तत्क्षणमेव पलायते। (पुनः हसित्वा, शान्तस्वरेण) अहं सूत्रं निश्चयेन अपनयामि, यदा जलं क्वथति तदा। चिन्ता मास्तु।
(मार्जालः अग्निप्रज्वालने मग्नः भवति।)
(जेम्स् बाण्ड् ध्वनिः। ध्वनेः अन्तिमः भागः।)

गू (स्वगतम्) - हा ! एषः मार्जालः लब्धः। मूषकः कथमपि रक्षितव्यः। कः उपायः? (चिन्तयति।) हा ! एकां मार्जालीं आनयामि।

(गूगुलः गत्वा मार्जाल्या सह आगच्छति। तस्याः कर्णे किमपि वदति।)

ली - छिः! छिः! किं करणीयं मया ? एतेन अहं दोषिणी भविष्यामि। अस्तु। कस्यापि प्राणरक्षणार्थं एवं करोमि।

(मार्जालस्य समीपं चलति।पुनः दूरं गच्छति। एवं आकर्षयति। मार्जालः तां पश्यति।)

लः (स्वगतम्) - का एषा. . .? किं कुर्वती अस्ति अत्र. . ? आ. . . मम सौन्दर्येण आकर्षिता इव भासते। पश्यामि. . . ।(तस्याः समीपं गच्छति।)

(गूगुलः पात्रस्य समीपं गत्वा सूत्रं अपनयति, मूषकं मोचयति च।)

गू - इदानीं मार्जाली अपि रक्षितव्या। ओ . . . किं कर्तव्यम्? हा. . . मूषक ! अत्रागच्छतु। (कर्णे उपायं वदति।)

(मूषकः ज्वलन्तं काष्ठं स्वीकरोति। शनैः शनैः मार्जालस्य समीपं गच्छति। तस्य पुच्छं ज्वालयित्वा पलायनं करोति।)

लः (आघ्राय स्वगतम्) - कः एषः दुर्गन्धः? हा. . . किमपि ज्वलन् अस्ति। (. . . इतस्ततः पश्यति।) आ. . . ! मम पुच्छम्!! (उच्चैः आक्रन्दनं करोति।) जलम्. . ! जलं कुत्रास्ति ? जलम्. . . ! (इति वदन् इतस्ततः धावित्वा पात्रे

पतति।) आ. . . . (आक्रन्दनम्।)

— नीतिः —

"अरक्षितं तिष्ठति दैवरक्षितम्"

——x——

संस्कृतसङ्घस्य वार्षिकनिवेदिका (२००६-०७)

संस्कृतसङ्घस्य नूतनकार्यनिर्वाहकवर्गव्यवस्था २००५ तमे वर्षे डिसेम्बर् मासे अभवत्। उत्तेजनपूरितानां कार्यकर्तॄणां आगमनेन प्राप्तद्विगुणीकृतोत्साहः सङ्घोऽयं २००६ तथा च २००७ तमयोः वर्षयोः बहून् कार्यक्रमान् अचालयत्।

१. संस्कृतसम्भाषणशिबिरम् — **बेङ्गलूरुनगरे स्थिता 'संस्कृतभारती' संस्था भारतीयविज्ञानसंस्थायां मार्च् २००६, जून् २००६ तथा च फिब्रवरी २००७ मासेषु संस्कृतसम्भाषणशिबिराण्यचालयत्। संस्कृतसेविकाः कु. अम्बिका, कु. गीता, कु. सुवर्णा च शिबिरेषु शिक्षिकाः आसन्। संस्कृतसम्भाषणे सुलभतां, सरलतां च अनुभूतवन्तः सर्वे विद्यार्थिनः।**

२. संस्कृतव्याकरणशिबिरम् —**संस्कृतभाषाभ्यासकार्यक्रमं अग्रेऽपि अनुवर्तयितुं द्वितीयसोपानरूपेण फिब्रवरी २००७ मासस्य द्वितीयार्धे 'प्रारम्भिकसंस्कृत-व्याकरणशिबिरम्' सञ्चालितम्। श्री शंङ्करभट्टमहोदयः, श्री सतीशमहोदयः, श्रीनारायणभट्टमहोदयश्च अस्मिन् शिबिरे शिक्षकाः आसन्।**

३. "भारतीयसंस्कृतेः परिचयः" भाषणसरणिः — **जनवरी २००६ मासादारभ्य प्रत्येकस्मिन् मासे "भारतीयसंस्कृतेः परिचयः" इति नाम्ना**

शतावधानिना डा. रा. गणेशमहोदयेन भाषणानि सुसंपन्नान्यासन्। भाषणेषु अष्टादशविद्यास्थानानि विशदीकृतानि। आध्यात्मिक-अदिभौतिक-आधिदैविकस्थितयश्च सोदाहरणाः निरूपिताः। वेदेषु स्थितानां विभिन्नमन्त्राणां परिचयः कारितः, व्याख्यानञ्च कृतम्। ईशावास्य, प्रश्न, केन, कठ, मुण्डक, माण्डूक्य, बृहदारण्यक, तैत्तिरीयादीनां उपनिषदां स्थूलं विवरणमपि दत्तम्।

४. गुरुपूर्णिमाचरणम् — जूलै २००६ मासे ११ तमे दिनाङ्के "गुरुपूर्णिमा-महोत्सवः" आयोजितः। तस्मिन् सन्दर्भे सस्कृतसङ्घस्य पूर्वाध्यक्षः भारतीयविज्ञानसंस्थायाः आङ्गिकरसायनशास्त्रविभागे विश्रान्तप्राचार्यः प्रो. बालसुब्रह्मण्यमहोदयः सम्मानितः। सभाकार्यक्रमस्य अध्यक्षः आसीत् विद्युद्विभागप्राचार्यः डा. नारायणन्महोदयः। संस्कृतभारत्याः श्रीमान् सत्यनारायणः अस्य कार्यक्रमस्य मुख्यातिथिः आसीत्।

५. वाग्गेयकार–आराधनम् — मार्च् २००७ मासे चतुर्थे दिनाङ्के वाग्गेयकाराणां आराधनम् आचरितम्। प्रातः काले नववादनसमये साम्प्रदायिकसङ्कीर्तन-यात्रया आरब्धा स्वरझरी रात्रौ नववादनपर्यन्तं सर्वान् पुनीतान्

कृतवती। प्रातः काले पूजाकार्यक्रमानन्तरं ‘सुनादप्रिय’ सङ्गीतनिवहेन, भारतीयविज्ञानसंस्थायाः विद्यार्थिभिस्सह घनरागपञ्चरत्नकृतीनां गोष्ठिगानं प्रचलितम्। तत्पश्चात् संस्थायाः पूर्वविद्यार्थी, शास्त्रीयसङ्गीतविद्वान् मानसनयनमहोदयः त्यागराजस्वामिनः कृतीनां जनरञ्जकं व्याख्यानं अददात्। सायङ्काले पञ्चवादनपर्यन्तं नैकाः सङ्गीतज्ञाः विद्यार्थिनः, विद्यार्थिन्यश्च कर्णाटक, हिन्दुस्थानीय सम्प्रदायावनुसृत्य निजगानवाद्यैः स्वरार्चनमकुर्वत। षड्वादनसमये सतीशधावन् सभाङ्गणे आयोजितया सङ्गीतकलानिधेः कर्णाटकराज्यसङ्गीतविदुषः डा. आर्. के. श्रीकण्ठन्-महोदयस्य शास्त्रीयसङ्गीतामृतधारया आराधनकार्यक्रमः समाप्तः। डा. श्रीकण्ठन् महोदयस्य सङ्गीतकार्यक्रमे विद्वान् आर्. एस्. रमाकान्त-महोदयः सुस्वरसाहाय्यं कृतवान्। धनुर्वीणावाद्यसहकाराय विद्वान् सी. एन्. चन्द्रशेखरमहोदयः, मृदङ्गवाद्यसहकाराय विद्वान् वी. कृष्ण महोदयः, घटवाद्यसहकाराय विद्वान् फणीन्द्रभास्करमहोदयः, तम्बुरवाद्य-सहकाराय विद्वान् मानसनयनमहोदयः च उपस्थिताः आसन्।

६. अष्टावधानम् — मार्च् २००७ मासे २५ तमे दिनाङ्के सतीशधावन् सभाङ्गणे शतावधानिनः डा. रा. गणेशमहोदयस्य “अष्टावधानम्”

आयोजितम्। श्री सुधीरकृष्णस्वामीकेसरी, प्राचार्यः श्री के. एस्. कण्णन्, डा. रङ्गनाथः, श्री दीपकपरमशिवन्, श्रीमती नागलक्ष्मी, श्री भै. कामेश्वररावुः, श्री व. शिवरामकृष्णः, डा. शङ्करः, श्री राघवेन्द्रहेब्बालळु च पृच्छकाः आसन्। तथा च तस्मिन् सन्दर्भे संस्कृतसङ्घस्य वार्षिकपत्रिकायाः "संस्कृतिः"-इत्यस्याः २००७ वर्षीयसञ्चिका विद्वद्भिः लोकार्पिता।

७. विष्णुसहस्रनामपारायणम् — **प्रत्येकस्मिन् स्थिरवासरे संस्कृतसङ्घः विष्णुसहस्रनामपारायणं कुर्वन् अस्ति। अस्मिन् कार्यक्रमे बहवः विद्यार्थिनः भागं गृह्णन्ति।**

८. सांस्कृतिककार्यक्रमाः — **संस्कृतसम्भाषणशिबिराणां समारोपसन्दर्भेषु शिबिरभागिनैः छात्रैः गैर्वाण्यां "मार्जालस्य दमनम्", "संन्यासेच्छा", "चतुरः कालिदासः", "रुग्णवैद्यसंवादः" इति रूपकाणि, "चाणक्यः", "भो भो अलसः मा भवतु" इति एकाभिनेतृरूपकद्वयम्, समूहगानानि, हास्यकणिकाः, कथावाचनमित्यादयः सांस्कृतिककार्यक्रमाः प्रदर्शिताः।**

९. 'वन्देमातरम्' गीतस्य शतमानोत्सवः — **'वन्देमातरम्' गीतस्य शतमानोत्सवसन्दर्भे भारतीयविज्ञानसंस्थायाः छात्रैः दीपकपरमशिवन्,**

सत्यप्रकाश, प्रशान्तपोद्दिस्, विनोदकुमारैः हिन्दुस्थानीयसङ्गीतकार्यक्रमः आयोजितः। वन्देमातरगीतं विभिन्नेषु रागेषु आलापितम् आसीत्। दीपकमहोदयः सारङ्गीवादनेन, निजगाननिपुणतया च, सत्यप्रकाशमहोदयः धनुर्वीणावादनेन, प्रशान्तमहोदयः तबलावाद्यसाहाय्येन, विनोदमहोदयः स्वरमण्डलसहकारेण आहूतान् श्रोतॄन् अरञ्जयन्।

नूतनकार्यदर्शिनौ कार्तीकप्रसादौ संस्कृतसङ्घस्य नवीनं अन्तर्जालस्थानं परिकल्पितवन्तौ। अस्मिन् वर्षे भारतीयविज्ञानसंस्थायाः 'जिम् खाना'-भवने स्थिते रानडे ग्रन्थालये बहूनि संस्कृतपुस्तकानि अवलोकनार्थं स्थापितानि सन्ति।

——x——